॥ नंदिकेश्वरकाशिकारंभः॥

BHAU DAJI
डॉक्टर भाऊदाजीलाध्यस्मारकम्
MEMORIAL

श्रीगणेशायनमः नृत्तावसानेनटराजराजोननादढक्कांनवपंचवारं उध्धर्तुकामःसनकादिसिध्धानेतद्विमर्शेशिवसूत्रजालं ते
१ अत्रसर्वत्रसूत्रेषुध्वंत्यवर्णंचतुर्दशं धात्वर्थंसमुपादिष्टंपाणिन्यादीष्टसिध्धये २ अकारोब्रह्मरूपःस्यान्निर्गुणःसर्ववस्तु
षु चित्कलाभिस्समाश्रित्यजगत्भूपमुनीश्वरः ३ अकारःसर्ववर्णाग्र्यःप्रकाशःपरमेश्वरः परमःशिवइतिपाठान्तरं आद्य
मसेनयोसंगादभित्येवजायते ४ सर्वंपरात्मकंपूर्वंज्ञप्तिमात्रमिदंजगत् ज्ञप्तेर्भूयपश्यंतीमध्यमावाकृततःस्मृता ५ व
क्त्रेविशुद्धचक्राख्येवैखरीसामतातनः सृष्ट्याविर्भावमाद्यात्ममध्यमावाक्समायुतं ६ ज्ञप्त्याविर्भावमात्रात्मामध्यमावाक्
समीरितेतिपाठांतरं अकारंसन्निधौरूत्यजगतांकारणंततः ७ इकारःसर्ववर्णानांशक्तित्वात्कारणंमतं ७ जगत्सृष्टुमि
च्छायदात्यासीत्तदाभवत् कामबीजमितिप्राहुर्मुनयोवेदपारगाः ८ अकारोज्ञप्तिमात्रंस्यादिकारश्चित्कलामता उकारो
विष्णुरित्याहुर्व्यापकत्वान्महेश्वरः ९ ऋत्वक्सर्वेश्वरोमायांमनोवृत्तिमदर्शयत् तामेववृत्तिमाश्रित्यजगत्भूपमजीजनत्
१० ऋत्वक्सर्वेशोमायारूपांविस्तारितचराचरां पत्नीमाश्रित्यचिद्रूपोजनयामासकेवलइतिपाठांतरं वृत्तिरित्तिमतोरत्र भे
दलेशोनविद्यते चंद्रचंद्रिकयोर्यद्वद्यथावागर्थयोरपि ११ वागर्थाविवसंपुरीतिपाठांतरम् स्वेच्छयासस्यचिच्छक्तो विश्वमु
न्मीलयत्यसौ वर्णानांमध्यमंक्लीवमृत्वर्णद्वयंविदुः १२ ऐओङ्मायेश्वरात्मैक्यविज्ञानंसर्ववस्तुषु साजिज्ञासर्वभूतानां
मराकरूतिनिश्चितं १३ ऐओच्ब्रह्मण्यरूपःसन्जगत्सांतर्गतंततः इच्छायाविस्तरंकर्तुमाविरासीन्महामुनिः १४ भू
तपंचकमेतस्माद्भूयवरणमहेश्वरात् व्योममयायंयुवत्यारव्यभूतान्यासीत्सरावहि १५ हकाराद्व्योमसंज्ञश्चयकाराद्वा
युरुच्यते रकाराद्वह्निस्तोयंतुयकारादितिसैववाक् १६ आधारभूतंभूतानामन्नादीनांचकारणं अन्नाद्रेतस्ततोजी
वःकरणत्वाद्गुणीरितं १७ शब्दस्पर्शौरूपरसगंधाश्चसमङ्गणनम् व्योमादीनांगुणास्येतेजानीयात्सर्ववस्तुषु वाक्या

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

णीचक्षमभासीद्विराड्रूपंचिदात्मनः सर्वजंतुषुविज्ञेयंरुद्रावरादीनविद्यते १८ वर्गाणांतुर्यवर्णायेकर्मेंद्रियपदाहिते
घढधषूसर्वभूतानांपादपायूउपरुद्धकः २० कर्मेंद्रियगणात्येतेजानातिपरमार्थतः श्रोत्रत्वङ्नयनघ्राणजिह्वाधीन्द्रिय
पंचकं २१ सर्वेषामपिजंतूनामीरितंजबगडदश्र प्राणादिपंचकंचैवमनोबुध्यिरहंकृतिः २२ बभूवकारणत्वेनरसफछ
ठथचटतप् वर्गद्वितीयवर्णास्याःप्राणाद्याःपंचवायवः २३ मध्यवर्गत्रयाज्जाताअंतःकरणवृत्तयः अन्यद्वयेसमुद्भूतौ
पुरुषप्रकृतिर्गुणाः २४ तोपुरुषःप्रकृतीगुहेतिपाठांतरम् प्रकृतिंपुरुषंचैवसर्वेषामेवसंमतं सभूतमितिविज्ञेयंक-
षाभ्यामितिनिश्चितमितिपाठांतरम् २५ सत्वंरजस्तमइतिगुणानांत्रितयंपुरा समाश्रित्यमहादेवःशषसर्क्रीडतिप्रभुः
२६ शकाराद्राजसंरूपंषकारातामसोद्भवः सकारात्सत्वसंभूतिरितित्रिगुणसंभवः २६ तत्वातीतःपरःसाक्षीसर्वानु
ग्रहविग्रहः अहमात्मापरोहंस्यावितिशंभुस्तिरोदधे २८ इतिनंदिकेश्वरकृतकाशिका व्याख्यातचेयमुपमन्युना नम
शिवायदेवायसर्वज्ञायपरात्मने यैस्योन्मेषनिमेषाभ्यांव्यक्ताव्यक्तमिदंजगत् १ श्रीशंगुहंकुमारंचशैवतत्वविदाविशार
दं प्रणम्यनंदिकेशादीन्शिष्यकान्मुहुर्मुहुः २ श्रीशंकरमितिपाठांतरम् काशिकामादिसूत्राणांनंदिकेशकृतांशुभां
लोकोपकारिणींदिव्यांव्याकरोमियथामति ३ इहखलुसकललोकनायकःपरमेश्वरःपरमशिवःसनकसनंदनसन
त्कुमारादीन्श्रोतॄन्नंदिकेशपतंज्जलिव्याघ्रपादवसिष्ठादींश्चोत्थर्तुकामोढक्कानिनाद्याजेनचतुर्दशसूत्यात्मकंतत्व
मुपदिदेश तदनुतेसर्वेमुनींद्रवर्याश्चिरकालमाश्रितानामस्माकंचतुर्दशसूत्यात्मकंतत्वमुपदिशेयुरितिमत्वाःस्यसूत्र
जालस्यतत्वार्थनंदिकेश्वरोजानातीतितंनंदिकेश्वरप्रणिपत्यपृष्टवंतस्तेचस्मास्मृष्टवत्सषड्विंशतिकारिकारूपेणत-
त्सूत्राणामुपदिष्टमिछन्निदमाचष्टे नृत्तेति अद्मितिशेषः नटराजराजइत्यनेनमंगलानिदर्शितानिविश्वरूपाविला

अंत्यवर्णेतिवोभयथापिबहुव्रीहिःसमूहोन्यपदार्थःसमासोतःचतुर्दशेतिवापाठस्तदातत्सुरूषः ५

सेवैचित्र्यचमत्कारप्रवीणत्वान्नटराजराजःतांडवाख्यरासमात्रविलासेवैचित्र्यचमत्कारप्रवीणस्त्वेत्वन्यत्रनटादावपिस-
त्वात् सस्यात्मतत्वंवागाद्यगोचरमितिज्ञापनायढक्कानिनादव्याजेनसनकादीन्मुहुर्तुकामोयन्नवपंचवारंचतुर्दशवारंस्वांतर्गी
तंमात्मतत्वंप्रकटयितुंतदवसानेढक्कांननादअहंनदेतद्दितननिनादोद्भूतवर्णात्मकमायमतिरहस्यंशिवसूत्रजालंविवस
बंधिसूत्रसमूहंकृत्वाणरूपसूत्रसमूहंवाविमर्शेविचार्यस्फुटीकरोमीत्यर्थःविमर्शेइतिछांदसंबोध्यंअनुबंधाःपाणिन्युर्दृश्य
कारावेतिआहात्रेतिरणधित्वाद्यर्थः अंत्यवर्णेतिपाठःद्वयेकयोरितिवचतुर्दशेतिप्रयोगः धात्वर्थमिति धातुमूलकशास्त्रंप्रवृ
त्त्यर्थमित्यर्थःअंत्यवर्णजातत्वंद्वारंतिन्यायेन तथाचोत्तमिंद्रेणअंत्यवर्णसमुद्भूताधातवःपरिकीर्तिताइति तत्रायेनसूत्रे
णसर्ववर्णानांसमस्तभुवनानांचसमुद्भवरूपंस्वात्मतत्वमुपदिष्टमित्याहाकारइतिअनेनअःपरमेश्वरोनिर्गुणश्मायामाश्रि
त्यव्यापकःसगुणःणईश्वरआसीदितिसूत्रार्थःसूचितः अत्रप्रमाणमसद्वाइदमग्रआसीत्ततोयेसज्जायतेतिश्रुतिः
असत्ब्रह्मवेतिनिश्चयेनअग्नेस्सृष्टेः पूर्वमिदमकाररूपाक्षरात्मकमासीत्ततोक्षरादसतोवैसत्सगुणमजायतजातमितितदर्थतद्ध
क्कंगीतायांअक्षराणामकारोस्मीतिअतएवाहाकारइतिआदिरंत्येनसहेतेत्यादिरकारअंत्योहकारःअकारादिहकारांताःसर्वे
वर्णास्तनःपरमात्मानःसमभवन्नित्यर्थःसर्वमितिईश्वरएवानादिजीवोपाध्याश्रितकर्मप्रेरितभाणव्यापारानंतरंनाभौपराख्यमा
यापरिणाममुपेत्यहृदिपश्यंत्याख्यमुपेत्यविशुद्धचक्रेमध्यमाख्यमुपेत्यपश्चाद्वक्त्रेवैखर्याख्यमवाप्यवेदादिरूपोभवतीत्यर्थःश्रुति
रपिवागेवविश्वाभुवनानिजज्ञइतिसूक्ष्मावागेवविश्वाकारेणपरिणमतेविवर्ततेवेत्यर्थःश्रुत्यंतरमियंवाचैवविश्वंबहुरूपंनिब
द्धंतदेतदेकत्वविभज्योपभुंक्तइति सर्ववस्तुपुपरापश्यंतीमध्यमावैखर्यादिषुइंचित्कलामाश्रित्येत्यत्रगायत्रीमातांपद्मिनीमो
मितिवदिकारोबोध्यःतत्रसूत्रेईकारस्तुत्रिनेणेत्रेमोदितःइकारेणैवप्रकटितःअत्रवर्णसंभवकाले अइउऋलृइतिवर्णपंचमेव

सर्वेषामेकोनपंचाशद्वर्णानांभूतपंचकानांपंचवर्गाणांचक्रमेणयोनिः तच्चदीर्घह्रस्वभेदाद्विविधंतत्रसर्वत्रेकारस्येवस्वतंत्र
नामाहाकारमितिजगत्स्रष्टुमभूद्ब्रह्मेतिचउक्तंचस्वप्रकाशापरमात्मवस्तुनोदृश्यमानजगतःसिसृक्षयाकामतःपरमाद्यिवभूवेत्या
नंकामबीजमिदमेवनिश्चितमिति बीजबिंदुहयारूढंसार्द्धयोनिस्वरूपकं महाकामकलारूपमात्मानंचिंतयेत्प्रियेइतिचउक्तमेव
दृढयतिअकाररइतिउकाररतिउव्यापकत्वेनण्आर्सादित्यदर्श्वरत्रेतिभावः ननुसर्ववेदांतेषुपरमेश्वरएकइतिनिश्चितत्वान्मा
यार्माश्रित्यकथंसमाश्रित्यजगद्रूपअभूदित्युक्तेरद्वैतहानिः स्यादित्याशंक्याग्गामाहऋत्वगिति तत्रायपाठेऋपरमेश्वरःस्वमाया
मनोवृत्तिंऋ औदैक्षीयतामेवाश्रित्यस्वेच्छयाजगज्जनयामासेत्यर्थः पाठांतरेसनृतांमनोवृत्तिमाश्रित्येदंचराचरंजनयामासेत्य
र्थः ऋपरमेश्वरइत्यत्रऋतंसत्यंपरंब्रह्मपुरुषंकृष्णपिंगलमितिश्रुतिःप्रमाणं ऋतंतत्पदार्थेपरंब्रह्मसत्यमित्यर्थः श्रुत्यंतरमपिसो
ऽकामयतबहुस्यांप्रजायेयेतिश्रीतंत्रेपिममचाभून्मनोरूपंत्वंकारःपरमेश्वरीतिममवृत्तिर्मनोरूपमितिपाठांतरंऋत्ववर्णोयथाना
दात्मामापभौतयेत्यर्थः तदाद्यभेदत्रैद्यद्वतिवास्तवइत्यर्थः ननुजनयामासेत्युक्तेर्जन्यजनकभावेःद्वैतहानिःस्यादित्याशंकायांत
त्स्वेच्छानदेवानुप्रविश्यतदनुप्रविश्येतिश्रुतिमाश्रित्याह एओइमायेश्वरात्मेक्येति जन्यजनकत्वंचस्वस्येवतद्रूपेणवर्तनादिकिंना
द्वैतहानिःअकारोकाराभ्यांनिष्पन्नेनप्रणवरूपेणोंकारेणसगुणनिर्गुणयोरैक्येबोधितेतेनैवदृष्टांतेनसर्वत्राग्राह्यंबुध्यैद्वैतनि
रासोध्वनितःसमष्टिव्यष्टिभेदेनपूर्ववर्णयुतद्वितीयस्यतद्युततृतीयस्यचसमन्वयबोधकमिदंतत्सूत्रंअक्षरात्मकःइमायायुक्तः
सनृपःसअउज्ञानरूपःअज्ञानात्मासर्ववस्तूनामेकत्वाद्द्वैतापत्तिःननानात्वंजन्यजनकत्वंचस्वयंप्रविश्यतद्रूपेणवर्तनइत्य
र्थःवटबीजन्यायेनचेति पूर्वसूत्रहयजनितवर्णपंचकमेवजगत्कारणमितिप्रोक्तंउत्तरसूत्रवर्णानामपितस्मादेवसंभवः
समष्टिव्यष्टिभेदेनपूर्ववर्णयुतद्वितीयस्यपूर्ववर्णयुततृतीयस्यचसंयोगजनकमिदंसूत्रंसमन्वयबोधनमपिएकत्वेनो २

तं अत्राप्यपरत्वेसर्ववेदसंमतंच तथाचसनकदक्षिणामूर्तिसंवादमहावाक्यविवरणे शृणुत्वंसावधानेनचतुर्णामपिसाम्य
ता वेदानांचमहाभागचतुष्काणामीहोच्यते ब्रह्मक्षत्राद्येनयद्वत्सुतत्प्रज्ञानमुदीरितंप्रज्ञानंब्रह्मयस्मात्तस्मात्ब्रह्मात्म
हंयतः ततब्रह्मसर्वसास्तित्वात्तत्वमस्येक्यत्वतः अन्यत्ववारणार्थात्त्वयमात्मेत्यथर्वणीतिस्वात्मभूतस्यपरमेश्वरस्यजग
त्कारणत्वंकथमित्यशंकायामाहेऔजितितनः स्वातर्गतंजगद्विस्तारयितुमिच्छुः एआदित्यशक्तियुतंअक्षररइतिअतः पूर्व
सूत्रगतअकारेकारदीर्घयोगस्यैवएकारत्वमेकत्वंचसंप्रज्ञानस्वरूपेपरमेश्वरोयःसपूर्वसूत्रगतःअकारदीर्घउकारदी
र्घउकारदीर्घस्यैवयोगेऔकारत्वंयःसप्रज्ञानात्मभावाद्बृंहितःसऔकारोयस्यआदित्यांगिर्भाषेउक्तंस्वरयिमर्द्विन्यो
अकारज्ञानसंयोगात्सर्वसंभूतिरिष्यतइति इच्छयाजगत्स्तोद्विरयिमुद्युक्तइत्यर्थः अत्राह्यणवेनजगद्भासंमायायभवति
स्वतइतिज्ञानोत्तमेएवंतत्वसमुदायानांत्रयोदशवर्णाच्छिवादिप्रकृत्यंतान्नामुद्भवः प्रकृतिपुरुषविवेकमुत्तरत्रकथमित्यस्मि
न्सूत्रेउपसंहारत्वेनपठ्यते अत्रह्रस्वदीर्घप्रभेदाच्चतुर्दशस्वराणामेवसंकीर्तनंचतुर्दशभुवनचतुर्दशचक्रचतुर्दशप्रक
राणामितिनिष्कर्षः तदुक्तंशिवगौरीसंवादेमहामंत्रतत्वप्रकाशिन्यां तत्वमंत्रमहेशानिममरूपंत्वमेवहि चतुर्दशात्मकं
चक्रंतवचक्रमितीरितं त्रयोदशात्मकंतुर्यमावयोर्मंत्रमंबिके उच्छूनकालेबिंदुत्मातस्माद्क्षरसंभवः बिंदुस्फोट
नमात्रेणवर्णानांचसमुद्भवः तस्मादाकाशमुत्पन्नंभूतानिसमजायत बिंदुःश्रीचक्रबीजस्यपरंब्रह्मात्मकंत्रि
ति चतुर्दशात्मकंपश्चाच्चक्राकारेणसंभवः उत्पन्नभुवनान्यत्रचतुर्दशचतुर्दशेतितततःआत्मनःसकाशादाका
शादिभूतसंभवमाहभूतेतिसएवपरमेश्वरएवहकारादिति तस्माद्वायुतस्मादात्मनःआकाशःसंभूतः
आकाशाद्वायुर्वायोरग्निरग्नेरापश्चतेरेतस्मात्परमेश्वराद्भूतपंचकमाकाशादिकंप्रपंचकारणमासीत् अत्रास्मि-

स्त्रेभूतपंचकमासीदित्युक्तंतत्राकाशादिभूतचतुष्टयमेवोक्तंनपृथिवीत्याकांक्षायांयदाधारस्वरूपंसमस्तकारणमितिसूत्रां
तरेणावोचत् आधारेति भूतानांप्राणिजातानामुद्भिज्जस्वेदजजरायुजांडजादीनांप्रधानकारणत्वादाधारभूतंपृथिवीपुनश्चान्न
पानादीनांकारणं अन्नाद्येतद्इतिन्यायात् एतेषांकारणत्वात्प्रत्यक्षत्वेनलक्षणित्युदीरितमित्यर्थः ततःपृथिव्यादीनांकारणत्वेनस्थिता
नांतन्मात्राणामुत्पत्तिक्रममाह शब्दस्पर्शौरूपरसगंधाश्चत्रमद्गणनम् ओमादीनांगुणास्त्येतेजानीयात्सर्ववस्तुष्विति ओमादीनांगु
णानेककारणानेतान्जानीयात् सर्ववस्तुष्विति अत्रकेषांचिद्ग्रंथेअकारादिक्षरोंकोताःषट्त्रिंशद्वर्णाःषट्त्रिंशत्तत्वमयाःकतिचि
तंत्रराजादिग्रंथपंचपंचकमेणभूतलिपिप्रकारेणएवमन्यत्रबीजनिर्णयभेदाबहवःसंतिअत्रतुतंत्रोक्तप्रकारेणोन्घाटितंपंचव
र्गेषंतिमावर्णाःशब्दस्पर्शादयोगुणाइतिवचनात्सर्वजगत्कारणभूतस्यवर्णरूपपुरुषस्यसर्वेषांचेतिओमादिगुणाइत्यर्थः
ततःसूत्राभ्यांकर्मेंद्रियवर्गमुद्घाटयति वाक्पाणीचत्यभ्यासीदति चिद्रूपशिवस्यप्राणिजातस्यचक्षकारभकारोरुछवरा
दिषुविनाविराड्रूपंविज्ञेयमित्यर्थः अथक्रमप्राप्तंपादिकमाहघढधषूसर्वभूतानांपाद्यायूपरुछकः कर्मेंद्रियगुणाद्ये
तिजातादिपरमार्थतः इतिपरमशिवसकाशादिमेकर्मेंद्रियगुणाःसर्वजंतूनांपादपायूपरुछाघढधवर्णाजातारत्यर्थः क्र
मप्राप्तेज्ञानेंद्रियसंभवमाहश्रोत्रेतिवर्गाणांमध्यवर्णोस्योज्ञानेंद्रियगणःस्मृत इतिसर्वत्रसर्वेषांप्राणिजातानामेतेवर्णा
ज्ञानेंद्रियाणांजनकाइतिवाविज्ञेयमित्यर्थः ततःप्राणादिपंचकमनोबुध्यहंकाराःसमुन्मील्यन्तेप्राणादीति एतेरष्टवर्णैः
प्राणादिपंचमनोबुध्यहंकृतयश्चजगतांकारणत्वेनसंभूताःइत्यर्थः ततःसर्वप्राणिकारणत्वेनाद्यंतवर्गहृद्याद्यक्षरग्रह
णत्वेनसंपुटीभावंप्रकृतिपुरुषाभ्यांप्रकाशयतिप्रकृतिमिति ककारपकारजातोप्रकृतिपुरुषावित्यर्थः ततोःवरुछात्रयंनि ३

रूपयतिसत्वमिति पुरासृष्टेःप्राक्शषसवर्णसंभूतांसत्वरजस्तमोगुणानाश्रित्यपरमशिवःसर्वभूतेषुक्रीडतीत्यर्थः ह
कारादितिस्पष्टंसर्वतत्वजनकःस्वयंतत्वातीतइतिज्ञापनार्थमेतत्सूत्रंचकारेत्याहतत्वातीतइतिसर्वानुग्रहविग्रहःसाक्ष
त्तत्वातीतोहस्यादितिढकानिनाद्व्याजेनसर्वेषांमुनिजनानांतत्वमुपदिशंतिरोदधइत्यर्थःहकारःशिववर्णःस्यादितिवो
यागमस्थितिरितिशिवम्इतिनंदिकेश्वरकाशिकासमाप्तिमजीगमत् काशीविश्वेश्वरार्पणमस्तु शाके१७८६रक्ताक्षी
नामसंवत्सरे फा० शु० ७ मंदवासरे ४ ४ ४ ४

ग्रंथसंख्या १५००

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

DR. BHAU DAJI
डाक्टर भाऊदाजी इत्याख्यस्मारकम्
MEMORIAL